गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।विश्वे देवाः। जगती, ७ त्रिष्टुप्

**अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा।**

**प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवन्तो वनर्षदः॥ २.०३१.०१**

अस्माकम्- नः। रथम्- वाहनं लक्ष्यप्रापकरंहणप्रतीकम्। रथी ऋतस्य नो भवेति श्रुतेः ऋतं रथः। मित्रावरुणा- हे मित्रावरुणौ। आदित्यैः- अखण्डप्रकृतिजैः। रुद्रैः- द्रुतगतिभिः। वसुभिः- चित्तवृत्तिस्तम्भकारकैः। सचाभुवा- सह। अवतम्- रक्षतम्। वस्मनः परि- वासस्थानात् स्वगृहात्। वयो न- पक्षिण इव। प्र पप्तन्- पतन्तः। श्रवस्यवः- श्रुतिकामाः। हृषीवन्तः- उत्साहवन्तः। वनर्षदः- सम्भजनशीलहृत्स्थिताः रंहणप्रतीका रथा भवन्ति। रथी ऋतस्य नो भवेति श्रुतेः ऋतं रथः ॥१ ॥

**अध स्मा न उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुम्।**

**यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः॥ २.०३१.०२**

अध- अधुना। नः- अस्माकम्। रथम्- वाहनं लक्ष्यप्रापकगतिप्रतीकम्। विक्षु- प्रजासु। वाजयुम्- सम्पत्काममम्। सजोषसः- सहृदयाः। देवासः- देवाः। अभि- आभिमुख्येन। उत् अवत- रक्षत। पद्याभिः- पद्भिः। पाणिभिः- भुजैश्च। गतिभिः समीचीनकर्मभिश्चेति भावः। आशवः- क्षिप्रगामिनः। रजः- अन्तरिक्षं प्राणमयकोशमित्याध्यात्मिके। तित्रतः- तरन्तः। पृथिव्याः- भूम्याः। सानौ- समुच्छ्रिते देशे। जङ्घनन्त- सरन्ति ॥२ ॥

**उत स्य न इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः।**

**अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये॥ २.०३१.०३**

Dr. Ranganji

WEBOLIM

उत- अपि च। स्यः- सः। नः- अस्माकम्। इन्द्रः- परमेश्वरः। विश्वचर्षणिः- सर्वदर्शी। दिवः- नभसः। मारुतेन शर्धेन- मरुद्गणेन। सुक्रतुः- शोभनसङ्कल्पः। अवृकाभिः- अनावृताभिः। ऊतिभिः- रक्षाभिः। महे- महत्यै। सनये- लब्धये। वाजसातये- हव्यलाभाय। रथम्। नु- क्षिप्रम्। अनु स्थात्- अधितिष्ठतु ॥३॥

**उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथम्।**
**इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती॥ २.०३१.०४**

उत- अपि च। स्यः- सः। देवः- द्योतनशीलः। भुवनस्य- जगतः। सक्षणिः- सेव्यः। त्वष्टा- आत्मसूर्यः शिल्पी। ग्नाभिः- स्त्रीशक्तिभिः। सजोषाः- सहृदयो भूत्वा। रथम्। जूजुवत्- प्रेरयतु। इळा- वागधिदेवता। बृहद्दिवा- महाप्रकाशिका। भगः- सौभाग्याधिदेवता। रोदसी- द्यावापृथिव्यौ। पूषा- पोषक आत्मसूर्यः। पुरन्धिः- उषा ज्ञानोदयदेवता। पती- तस्या भर्तारौ। अश्विना- प्राणापानेशनशक्तिभूतावश्विनौ। अध- च। प्रेरयन्तु ॥४॥

**उत त्ये देवी सुभगे मिथूदृशोषासानक्ता जगतामपीजुवा।**
**स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे॥ २.०३१.०५**

उत- अपि च। त्ये- ते। देवी- द्योतनशीले। सुभगे- सौभाग्यवत्यौ। मिथूदृशा- परस्परं पश्यन्त्यौ। जगताम्। अपीजुवा- प्रेरयित्र्यौ। उषसानक्ता- उषाश्च रात्रिश्च। दैवप्रज्ञा च मनुष्यप्रज्ञा चेत्याध्यात्मिके। पृथिवि- हे भूमे। हे नभः। वाम्- युवाम्। नव्यसा- अभिनवेन। वचः- मन्त्रेण। स्तुषे- स्तौमि। त्रिवयाः- भूर्भुवःसुवराख्यान्नप्राणमनोमयहव्यसम्पन्नोऽहम्। स्थातुश्च वयः- ओषध्यादिहव्यम्। उपस्तिरे- उपस्तृणे। उपस्तरणपूर्वकं यच्छामि ॥५॥

**उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्यो३ऽज एकपादुत।**
**त्रित ऋभुक्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि॥ २.०३१.०६**

Dr.Rangaji
WEBOLIM

उत- अपि च। वः- युष्माकम्। शंसम्- मन्त्रम्। उशिजाम्- कामयमानानाम्। इव। श्मसि- कामयामहे। अहिर्बुध्न्यः- रुद्रः। अहीनमूलः। अजः- जन्मरहितः। एकपात्- एकगतिः। त्रितः- तीर्णः। ऋभुक्षाः- उरु भासमानः। सविता- सूर्यः। अपां नपात्- मूलशक्तिधाराजः। आशुहेमा- क्षिप्रगामी। धिया- स्वधारणया। शमि- शान्तभावनायाम्। चनः- ध्यानभावनादिहव्यम्। दधे- धारयति ॥६ ॥

**ए॒ता वो॑ व॒श्म्युद्य॑ता यजत्रा॒ अत॑क्षन्ना॒यवो॒ नव्य॑से॒ सम्।**

**श्र॒व॒स्यवो॒ वाजं॑ चका॒नाः सप्ति॒र्न रथ्यो॒ अह॑ धी॒तिम॑श्याः॥ २.०३१.०७**

वः- युष्माकम्। एता- इमानि। उद्यता- उद्यतानि। वश्मि- कामये। यजत्राः- पूज्याः। आयवः- उपासकाः। नव्यसे- अभिनवाय भावनाय। सं अतक्षन्- सम्यगकुर्वन्। श्रवस्यवः- श्रुतिकामाः। वाजम्- हव्यम्। चकानाः- उद्दीपयन्तः। कन दीप्तिकान्तिगतिषु। सप्तिर्न रथ्यः- अश्वो रथीव। धीतिम्- अस्मच्चित्तधारणाम्। अश्याः- व्याप्नुवन्तु ॥७ ॥

Dr. Ranganji

WEBOLIM